# ॥ श्री लक्ष्मी कवचम् ॥

संकलन : डॉ। मनस्वी श्रीविद्यालंकार ग्मनस्वी'
विशेष नोट : प्रत्येक पूजन कर्म में लक्ष्मी कवच का पाठ करने से शीघ्र लाभ होता है ।
विनियोग
ॐ अस्य सर्वसम्पति प्रदस्यास्य कवचस्य प्रजापति ऋषिः, बृहती छंदः पद्मालया देवी, धर्म अर्थ काम मोक्ष सिध्यर्थे पाठे विनियोगः ॥
लक्ष्मी कवचम्
ॐ ह्रीं कमलवासिन्यै स्वाहा मे पातु मस्तकम् ।
श्रीं मे पातु कृपालं च लोचने श्रीं श्रियै नमः ॥१॥
ॐ श्रीं श्रियै स्वाहेति च कर्णयुग्मं सदावतु ।
ॐ श्रीं ह्रीं क्लीं महालक्ष्म्यै स्वाहा मे पातु नासिकाम् ॥२॥
ॐ श्रीं पद्मालयायै च स्वाहा दन्तं सदावत ।
ॐ श्रीं कृष्णाप्रियाये च दन्तरन्ध्तं सदावतु ॥३॥
ॐ श्रीं नारायणेशायै मम कण्ठं सदावतु ।ॐ
श्रीं केशवकान्तायै मम स्कन्धं सदावतु ॥४॥
ॐ श्रीं पद्मानिवासिन्यै स्वाहा नाभिं सदावतु ।
ॐ ह्रीं श्रीं संसए मात्रे मम वक्षः सदावतु ॥५॥
ॐ श्रीं श्रीं कृष्णकान्तायै स्वाहा पृष्टं सदावतु ।
ॐ ह्रीं श्री श्रियै स्वाहा मम हस्तौ सदावतु ॥६॥
ॐ श्रीं निवासकान्तायै मम पादौ सदावतु ।
ॐ ह्रीं श्रीं क्लीं श्रियै स्वाहा सर्वांग मे सदावतु ॥७॥
प्राच्यां पातु महालक्ष्मीराग्नैय्यां कमलालया ।
पद्मा मां दक्षिणें पातु नैऋऋत्यां श्रीहरिप्रिया ॥८॥
पद्मालया पश्चिमे मां वायव्यां पातु श्रीः स्वयम् ।
उत्तरे कमला पातु ऐशान्यां सिन्धुकन्यका ॥९॥
नारायणेशी पातूर्ध्वमधो विष्णुप्रियावतु ।
संततं सर्वतः पातु विष्णुप्राणाधिका मम ॥१०॥
इति ते कथितं वस्त सर्वमन्त्रौघविग्रहम् ।
सर्वैश्वर्यप्रदं नाम कवचं परमाद्भुतम् ॥११॥
सुवर्णपर्वतं दत्वा मेरूतुल्यं द्विजात्णअये ।
यत् फलं लभते धर्मी कवचेन ततोऽधिकम् ॥१२॥

गुरूमभ्यर्च्य विधिवत् कवचं धारयेत् तु यः ।
कण्ठे वा दक्षिणे याहौ स श्रीमान् प्रतिजन्मनि ॥ १३ ॥
अस्ति लक्ष्मीगृहे तस्य निश्चला शतपूरूषम् ।
देवेन्द्रैश्चासुरेन्द्रैश्च सोऽवध्यो निश्चित भवेत् ॥ १४ ॥
स सर्वपुण्यवान् धीमान् सर्वयज्ञेषु दीक्षितः ।
स स्नातः सर्वतीर्थेषु यस्येदं कवचं गले ॥ १५ ॥
यस्मै कस्मै न दातव्यं लोभमोहभयैरपि ।
गूरूभक्ताय शिष्याय शरणाय प्रकाशयेत् ॥ १६ ॥
इदं कवचमज्ञात्वा जपेल्लक्ष्मीं जगत्प्रसूम् ।
कोटिसंख्यं प्रजप्तोऽपि न मंत्रः सिद्धिदायकः ॥ १७ ॥
॥ इति महालक्ष्मी कवचम् संपूर्णम् ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

---

Please send corrections to sanskrit@cheerful.com
Last updated November 22, 2001